# Shri Hanumadacharyapranitah Shrihanumat Stava

# श्रीहनुमदाचार्यप्रणीतः श्रीहनुमत्स्तवः

## Document Information

Text title : Shri Hanumadacharyapranitah Shrihanumat Stava

File name : hanumatstavaHhanumadAchArya.itx

Category : hanumaana, rAmAnanda

Location : doc_hanumaana

Author : hanumadAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# श्रीहनुमदाचार्यप्रणीतः श्रीहनुमत्स्तवः

आनन्दभाष्यकृद्रामानन्दं रामं तथेश्वरम् ।
भावानन्दं गुरुं नत्त्वा कुर्वेऽहं हनुमत्स्तवम् ॥ १॥

स्फुरद्विद्युदुल्लासवालाग्रघण्टा झणत्कारनादप्रवृद्धाट्टहासम् ।
भजे वायुसूनुं भजे रामदूतं भजे वज्रदेहं भजे भक्तबन्धुम् ॥ २॥

प्रपन्नानुरागप्रभाकाञ्चनाङ्गं जगद्गीतशौर्यं तुषाराद्रिधैर्यम् ।
तृणीभूतहेतिं रणोद्यद्विभूतिं भजे वायपुत्रं पवित्रात् पवित्रम् ॥ ३॥

भजे हेमरम्भावने नित्यवासं भजे बालभानुप्रभाचारुहासम् ।
भजे चन्द्रिकाकुन्दमन्दारहासं भजे सन्ततं रामसर्वेशदासम् ॥ ४॥

भजे लक्ष्मणप्राणरक्षासुदक्षं भजे तोषितानेकगीर्वाणपक्षम् ।
भजे घोरसङ्ग्रामसीमाहताक्षं भजे राममन्त्रप्रचारे सुदक्षम् ॥ ५॥

मृगाधीशनाथं क्षितिक्षिप्तपादं घनाक्रान्तजङ्घं कटिस्थोडुसङ्घम् ।
अजाण्डस्थकेशं भुजश्लेषिताशं जयश्रीसमेतं भजे रामदूतम् ॥ ६॥

चलद्वालघातं भ्रमच्चक्रवालं कठोराट्टहासप्रभिन्नाब्धिकाण्डम् ।
महासिंहनादाद् विशीर्णत्रिलोकं भजे चाञ्जनेयं प्रभुं वज्रकायम् ॥ ७॥

रणे भीषणे मेघनादे सनादे सरोषं समारोप्य सौमित्रिमंसे ।
घनानां खगानं सुराणां च मार्गे नटन्तं ज्वलन्तं हनूमन्तमीडे ॥ ८॥

नखध्वस्तजम्भारिदम्भोलिधारं भुजाग्रेण निर्भूतकालाग्रदण्डम् ।
पदाघातभीताहिजाताऽधिवासं रणक्षोणिदक्षं भजे पिङ्गलाक्षम् ॥ ९॥

महाभूतपीडां महोत्पातपीडां महाव्याधिपीडां महाधिप्रपीडाम् ।
हरत्याशु ते पादपद्मानुरक्तिः नमस्ते कपिश्रेष्ठरामप्रियाय ॥ १०॥

सुधासिन्धुमुल्लङ्घ्य सान्द्रे निशीथे सुरान्तः प्रगुप्तां सुधामोषधीं ताम् ।
रणाद् द्रोणशैलेयसारेण नेतुं विनाऽज त्वया कः समर्थः कपीन्द्र ॥ ११॥

समुद्रं तरङ्गादिरौद्रं विनिद्रो विलङ्घ्योडुसङ्घं स्तुतो मर्त्यसङ्घैः ।
निरातङ्कमाविश्य लङ्कां विशङ्को भवानेव सीतावियोगापहारी ॥ १२॥

क्षमानाथनाम्ना क्षमाजेशनाम्ना ह्यशोकां सशोकां विहायाप्रहर्षात् ।
वनं तद् घनं जीवनं दानवानां विपाट्य प्रहृष्यन् हनूमँस्त्वमेव ॥ १३॥

जने हारयन् भीतिपीडां शरीरे निरूढं रणारूढगाढप्रताप ।
भवत्पादभक्तिं भवद्भक्तिरक्तिं कुरु त्वं हनूमन् प्रभो मे दयालो ॥ १४॥

नमस्ते महासत्ववाहाय तुभ्यं नमस्ते महाकालकालाय तुभ्यम् ।
नमस्ते महामर्त्यकायाय तुभ्यं नमस्ते सदा स्वामिकार्याय तुभ्यम् ॥ १५॥

द्वारपीठेश्वरश्रीमधनुमदार्यनिर्मितः ।
स्तवोऽयं पठतां भूयात् सर्वसौख्यप्रदायकः ॥ १६॥

इति श्रीहनुमदाचार्यप्रणीतः श्रीहनुमत्स्तवः सम्पूर्णः ।

Encoded and proofread by Mrityunjay Pandey

*Shri Hanumadacharyapranitah Shrihanumat Stava*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*